रज:शय:, पुं, ( रजसि शेते । शी+"अधिकरणे शेते:।" ३ । २ । १५ । इति अच् ।) कुक्कुर:। इति शब्दमाला ॥ ( धूलिशायिनि, त्रि । रजतमयी । यथा, वाजसनेयसंहितायाम् । ५ । ८ ।

"या तेऽग्ने रज:शया तनूर्वर्षिष्ठा ॥"

"रज:शया रजतमयीति ।" तद्भाष्ये महीधर: ॥)

रज:सारथि:, पुं ( रजसां सारथिरिव । ) वायु:। इति शब्दरत्नावली ॥

रजक:, पुं. (रजति निर्णेजनेन श्वेतिमानमापादयति वस्त्रादीनामिति। रन्ज+"शिल्पिनि ष्वुन्।" (इतिखनिरञ्जिभ्य: परिगणनं कर्तव्यम् ।" ३ । १ । १४५ । इति ष्वुन् । ) वर्णसङ्करजातिविशेष:। धोवा इति भाषा ॥ ( यथा, भागवते । १० ।४१।३२ ।

"रजकं कञ्चिदायान्तं रङ्गकारं गदाग्रज:।
दृष्ट्वायाचत वासांसि विधौतान्युत्तमानि च ॥")

स च तीवरपत्न्यां धीवराज्जात:। इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्याय:। निर्णेजक: २। इत्यमर: । २ । १० । १० ॥ शौचेय: ३ कर्म्मकीलक: ४ । इति शब्दरत्नावली ॥ धावक: ५ । इति हेमचन्द्र: । ३ । ५ । ७८ ॥ रजकस्य वस्त्रनिर्णेजनप्रकारो यथा,—

"वासांसि फलके: श्लक्ष्णैर्निर्णेज्यान्नजक: शनै: ।
अतोऽन्यथा हि कुर्व्वीत दण्ड्य: स्यात् पणमाषकम् ॥"

इति मात्स्ये २०१ अध्याय: ॥

( रजकान्नभक्षणप्रायश्चित्तं यथाह आपस्तम्ब:।

"रजके चैव शैलूषे वेणुचर्म्मोपजीविनि ।
एतेषां यस्तु भुञ्जीत द्विजश्चान्द्रायणञ्चरेत् ॥"

इति प्रायश्चित्तविवेक: ॥ विशिष्टस्यैव प्रत्यय: ॥)

अंशुक: । इति विश्व: ॥

रजकी, स्त्री, रजकपत्नी । रन्जधातो: णकप्रत्ययान्तादीपि सति सिद्धा । इति मुग्धबोधव्याकरणम् ॥ ( यथा, आर्य्यासप्तशत्याम् । ४०२ ।

"पटपट इव रजकीभिर्मथितो भुक्तापि निर्दयं ताभि: ।
अर्थंग्रहणेन विना चपल ! मुक्तोऽसि कुलटाभि: ॥ )

रजतं, क्ली, ( रजति प्रियं भवति रज्यत इति वा । रन्ज+"पृषिरञ्जिभ्यां कित् ।" उणा० । ३ । १११ । इति अतच् कित्कार्य्यञ्च ।) रूप्यम् । इत्यमर: । २ । ६ । ९९ । हस्तिदन्त: । धवल: शोणितम् । हार: । ह्रद: । शैल: । ( स तु शाकद्वीपस्थ एव । यथा, मात्स्ये १२१ । १४ ।

"रत्नमालान्तरमय: शाल्मलश्चान्तराचलात् ।
तस्यापरेण रजतो महानस्तो गिरि: स्मृत: ॥")

स्वर्णम् । इति हेमचन्द्र: । ३ । १०६ ॥ शुक्लवर्णविशिष्टे, त्रि । इत्यमरटीकायां भरत: ॥ पितृकार्य्ये रजतपात्रादीनां प्राशस्त्यादि यथा,

"सौवर्णं राजतं ताम्रं पितॄणां पात्रमुच्यते ।
रजतस्य कथा वापि दर्शनं दानमेव वा ॥
राजतैर्भाजनैरेषामथवा रजतान्वितै: ।
वार्य्यपि श्रद्धया दत्तमक्षयायोपकल्पते ॥
यथार्घ्यपिण्डभोज्यादौ पितॄणां राजतं मतम् ।
शिवनेत्रोद्भवं तस्मादतः तत् पितृवल्लभम् ।
अमङ्गलं तद्यत्नेन देवकार्य्येषु वर्ज्जितम् ॥"

इति मात्स्ये १७ अध्याय: ॥

रजतद्युति:, पुं, (रजतस्येव द्युतिरस्य ।) हनूमान् । इति शब्दरत्नावली ॥

रजतप्रस्थ:, पुं, ( रजतस्तन्मय: तद्वत् शुभ्रो वा प्रस्थ: सानुरस्य । ) कैलासपर्व्वत: । इति त्रिकाण्डशेष: ॥

रजताचल:, पुं, ( रजतप्रधानोऽचल इव । शाकपार्थिवादिवत् समास: । ) रौप्यपर्व्वत: । तस्य परिमाणं दानविधिश्च यथा,—

"राजतो नवमस्तद्वद्दशम: शर्कराचल: ।
वक्ष्ये विधानमेतेषां यथावदनुपूर्व्वश: ॥
अत: परं प्रवक्ष्यामि रौप्याचलमनुत्तमम् ।
यत्प्रसादान्नरो याति सोमलोकं द्विजोत्तम ॥
दशभि: पलसाहस्रैरुत्तमो रजताचल: ।
पञ्चभिर्म्मध्यम: प्रोक्तस्तदर्द्धेनावर: स्मृत: ॥
अशक्तो विंशतेरूर्द्धं कारयेत् शक्तित: सदा ।
विष्कम्भपर्व्वतांस्तद्वत् तुरीयांशेन कल्पयेत् ॥
पूर्व्ववद्राजतान् कुर्य्यान्मन्दरादीन् विधानत: ॥"
पूर्व्ववत् रत्नाचलवत् ।

"कलधौतमयांस्तत्र लोकेशान् रचयेद्बुध: ।
ब्रह्मविष्ण्वर्कवत् कार्य्यो नितम्बोऽत्र हिरण्मय: ।
राजतं स्याद्यदन्येषां समन्तादिह काञ्चनम् ॥
शेषञ्च पूर्व्ववत् कुर्य्यात् होमजागरणादिकम् ।
प्रदद्यात्तु प्रभाते तु गुरवे रौप्यपर्व्वतम् ॥
विष्कम्भशैलानृत्विग्भ्य: पूज्य वस्त्रविभूषणै: ।
इमं मन्त्रं पठन् दद्याद्दर्भपाणिर्व्विमत्सर: ॥
पितॄणां वल्लभं यस्मात् विष्णोर्व्वा शङ्करस्य च ।
रजतं पाहि तस्मान्न: शोकसंसारसागरात् ॥
इत्थं निवेद्य यो दद्यात् रजताचलमुत्तमम् ।
गवामयुतदानस्य फलं प्राप्नोति मानव: ॥
सोमलोके सगन्धर्व्वै: किन्नराप्सरसाङ्गणै: ।
पूज्यमानो वसेद्विद्वान् यावदाभूतसंप्लवम् ॥"

इति मात्स्ये ७ अध्याय: ॥

( कैलासपर्व्वत: । यथा, महानिर्व्वाणतन्त्रे ।

"रजताचलमध्ये तु कुवेरेश्वर ईरित: ॥")

रजताद्रि:, पुं, ( रजतमयस्तद्वत् शुभ्रो वा अद्रि: । शाकपार्थिववत् समास: । ) कैलासपर्व्वत: । इति हेमचन्द्र: । ४ । ९४ ॥

रजनं, क्ली, (रज्यत इति । रन्ज्+"रञ्जे: क्युन् ।" उणा० २ । ७९ । इति क्युन् । "रजकरजनरज:सूपसंख्यानम् ।" ६ । ४ । २४ । इति वार्त्तिकोक्तेर्नलोपश्च । ) राग: । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥ ( यथा, महाभारते । ८ । ५२ । ६ ।

"यथा वा वाससी शुक्ले महारजनरञ्जिते ।
बिभृयाद् युवती श्यामा तद्वदासीद्वसुन्धरा ॥")

ऋषिविशेषे, पुं । यथा, तैत्तिरीयसंहितायाम् । २ । ३ । ८ । १ ।

"रजनो वै कौणेय: क्रतुजितं जानकिं चक्षुर्व्वनुयमयात् ॥" )

रजनि:, स्त्री, ( रज्यन्ति लोका यत्र । रन्ज्+बाहुलकादनि: । इत्युज्ज्वलदत्त: । २ । १०३ ।) रात्रि: । इत्यमरटीका ॥ ( यथा, कथासरित्सागरे ।१८ । १४५ । ।

"इत्येवं श्लाघ्य समयं प्राप्तायां रजनौ च तान् ।
आमन्त्र्य विप्रान् प्रययौ श्मशानं स विदूषक: ॥")

रजनी, स्त्री, ( रजनि+कृदिकारादिति ङीष् । ) रात्रि: । ( यथा, महाभारते । ३ । ६९ । २८ ।

"सा सुप्त्वा रजनीन्तत्र पितुर्वेश्मनि भाविनी ।
विश्रान्ता मातरं राजन् ! इदं वचनमब्रवीत् ॥")

हरिद्रा ॥ ( अस्या: पर्य्यायो यथा,—

"हरिद्रा पीतिका गौरी काञ्चनी रजनी निशा ।
मेहघ्नी रञ्जनी पीता वर्णिनी रात्रिनामिका ॥"

इति वैद्यकरत्नमालायाम् ॥

यथा, नवधे । २२ । ४९ ।

"अस्या: सुराधीशदिश: पुरासीत्
यदम्बरं पीतमिदं रजन्या ।
चन्द्रांशुचूर्णव्यतिचुम्बितेन
तेनाधुना नूनमलोहितायि ॥" )

जतुका । इत्यमर: । २ । ४ । १५३ ॥ ( यथा, बृहत्संहितायाम् । ४४ । ६ ।

"दन्त्यन्दताञ्जनरजनीसुवर्णपुष्पाग्निमन्थाश्च ॥" )

नीलिनी । इति मेदिनी । ने, ११६ ॥ (शाल्मलीद्वीपस्थनदीभेद: । यथा, भागवते । ५।२०।१० ।

"अनुमती सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति ॥" )

रजनीकर:, पुं, ( रजनीं करोतीति । कृ+ट: ।) चन्द्र: । इति शब्दरत्नावली ॥ ( यथा, भागवते । ४ ।२८ । ३४ ।

"हित्वा गृहान् सुतान् भोगान् वैदर्भी मदिरेक्षणा ।
अन्वधावत पाण्ड्येशं ज्योत्स्नेव रजनीकरम् ॥")

रजनीगन्धा, स्त्री, ( रजन्यां गन्धोऽस्या: । रात्रौ विकाशात् तथात्वम् । ) स्वनामख्यातश्वेतवर्णपुष्पविशेष: । इति लोकप्रसिद्धि: ॥

रजनीचर:, पुं, ( रजन्यां चरतीति । चर+"चरेष्ट: ।" ३ । २ । १६ । इति ट: ।) राक्षस: । इति शब्दरत्नावली ॥ (यथा, रामायणे । ७।५।४।

"स तया सह संयुक्तो रराज रजनीचर: ॥"

तथा च ।

"ओजोऽशनानां रजनीचराणां
आहारहेतोर्न शरीरमिष्टम् ।
गर्भं हरेयुर्यदि ते न मातु-
र्लब्धावकाशं न हरेयुरोज: ॥"

इति चरके शारीरस्थाने द्वितीयेऽध्याये ॥ )

चौर: ॥ यामिकभट: ॥ ( रात्रिविहारके, त्रि । यथा, हरिवंशे । २०२ । १८ ।

"ब्रह्मदत्तानाथ राजानं श्रान्तं रजनीचरम् ॥")

रजनीजलं, क्ली, ( रजन्या जलम् । ) नीहार: । इति हारावली । ६७ ॥